# ‘मनोगतम्’ [०२.०९] प्रसारण-तिथिः - २३-फरवरी, २०२०

[भाषान्तरं - सर्वश्री-डॉ.श्रुतिकान्त-पाण्डेय-गवीश-द्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, इदं मम सौभाग्यं यत् ‘मन की बात’ -‘मनोगतम्’ इत्यस्य माध्यमेन अहं कच्छतः कोहिमा-पर्यन्तं, कश्मीरतः कन्याकुमारीं यावत्, अशेष-देशस्य सर्वेभ्यः नागरिकेभ्यः पुनरेकवारं नमस्कर्तुम् अवसरं लब्धवान् | भवद्भ्यः सर्वेभ्यः नमस्कारः |

अस्मदीय-देशस्य विशालतायै विविधतायै च प्रणामाः विलसन्तुतराम्, नूनं प्रत्येकमपि भारतीयः अनयोश्च स्मरणं कृत्वा गर्वान्वितो भवति | तथा च, अस्याः विविधतायाः अनुभवावसरस्तु सदैव जनम् अभिभूतं करोति, आनन्द-सन्दोहेन आप्लावयति, अन्यतम-प्रकारेण चायम्, प्रेरणा-पुष्प-रूपः अस्ति | कतिपय-दिनेभ्यः प्राक्, अहं दिल्ल्याः हुनर-हाट्-इति कलाविपण्यां लघुनि स्थले, अस्मदीय-देशस्य विशालतायाः, संस्कृतेः, परम्पराणां, पानाशनयोः हार्दिक-भावानां च विविधतानां दर्शनम् अकरवम् | पारम्परिक-वस्त्राणि, हस्तशिल्पानि, कालीन- इति कटाः, भाण्डानि, वेत्राणां पित्तलानां च उत्पादाः, पञ्जाबस्य ‘फुलकारी’ति वस्त्रोपरि अभिरूप-कार्याणि, आन्ध्रप्रदेशस्य श्रेष्ठं चर्म-कार्यम्, तमिलनाडोः मनोरमाणि चित्र-कर्माणि, उत्तर-प्रदेशस्य पित्तलोत्पादाः, भदोही-त्यस्य(Bhadohi) कुथाः, कच्छस्य ताम्रोत्पादाः, अनेकानि सङ्गीत-वाद्ययन्त्राणि, असङ्ख्यानि वृत्तानि, अशेष-भारतस्य कलायाः संस्कृतेश्च परिदृश्यम्, सत्यमेव, अद्भुतमेवासीत्, तथा च, एतेषां पृष्ठ-भूमौ, शिल्पकाराणां साधना, निष्ठा, स्वीय-कलां प्रति च प्रेम्णः कथाः अपि, अतितरां प्रेरणादायिन्यः भवन्ति| हुनर-हाट्-इति कला-विपण्याम् एकस्याः दिव्यांग-महिलायाः वृत्तानि श्रुत्वा बहु सन्तोषम् अन्वभवम् | सा माम् अकथयत् यत् सा पूर्वं पाद-मार्गोपरि स्वीय-चित्र-कर्माणि विक्रीणाति स्म | परञ्च कलाविपण्या साकं सम्पर्कानन्तरं तस्याः जीवनमेव परिवर्तितम् | अद्य सा न केवलम् आत्मनिर्भरा, परञ्च स्वकीयं गृहमेकमपि क्रीतवती | सा अकथयत् यत् कलाविपण्यां अहम् अपरानपि बहून् शिल्पकारान् अमिलम्, तैः साकं सम्भाषणावसरमपि प्राप्तवती | अहमत्र सूचिता यत् कलाविपण्याः सहभागिषु कलाकारेषु प्रतिशतं पञ्चाशदधिकाः महिलाः सन्ति | तथा च, विगते वर्षत्रये कलाविपणीनां माध्यमेन, प्रायेण त्रिलक्षं कलाकाराः, शिल्पकाराः च अनेकविधान् वृत्तितावसरान् अवाप्नुवन् | कलाविपणी नाम, कलानां प्रदर्शनार्थं अन्यतम-

मञ्चरूपेण तु अस्त्येव, युगपदेव, एषा, जनानां स्वप्नान् अपि पिच्छ-युतान् विदधाति | एकं स्थलमस्ति तादृशं यत्र अस्य देशस्य विविधताम् उपेक्षितुं असम्भवमेव | शिल्पकला तु अस्त्येव, युगपदेव, पानाशनयोः अस्मदीया विविधतापि अस्ति | तत्र एकस्यामेव पङ्क्तौ इडलीडोसा-छोलेभटूरे-दालबाटी-खमणखांडवी-ति न जाने, किं किं आसीत्? अहं, स्वयमपि तत्र बिहारस्य स्वादिष्टस्य लिट्टीचोखा-व्यञ्जनस्य आनन्दमादत्तवान्, अतितराम् आनन्दम् अन्वभवम् | भारतस्य प्रत्येकमपि खण्डेषु बहुशः एतादृश्यः मेलाः, प्रदर्शन्यः चायोज्यन्ते | भारतम् अवगन्तुम्, भारतम् अनुभवितुं, यदापि अवसरं लभ्येत, अवश्यं गन्तव्यम् | 'एकं भारतम् - श्रेष्ठभारतम्' , आकण्ठं जीवितुं, स्वर्णिमावसरोऽयं भवति | भवन्तः न केवलं देशस्य कलाभिः संस्कृत्या च सम्पृक्ताः भविष्यन्ति, परञ्च देशस्य परिश्रम-शीलानां कलाकाराणां, विशेषेण च, महिलानां समृद्धौ अपि भवन्तः स्वीयं योगदानं विधातुं शक्ष्यन्ति - अवश्यं गच्छन्तु!

मम प्रियाः देशवासिनः! अस्माकं देशस्य महत्यः परम्पराः सन्ति। अस्माकं पूर्वजैः यदस्मभ्यं दायरूपेण प्रदत्तमस्ति, या शिक्षा दीक्षा चास्माभिः प्राप्ता तस्यां जीवमात्रं प्रति दयाभावः, प्रकृतिं च प्रति अपरिमितः प्रेमभावः अनन्योऽस्ति । एतानि सर्वाणि वृत्तानि, अस्माकं सांस्कृतिकं रिक्थं विद्यते | भारतस्य एतादृक्-परिवेशस्य आतिथ्यं गृहीतुं अखिल-विश्वतः भिन्न-भिन्न-प्रजातीनां पक्षिणः प्रतिवर्षं भारतम् आगच्छन्ति। भारतम् आवर्षम् अनेकासां प्रवासि-पक्षि-प्रजातीनां आवासः भवति। एतदपि सूच्यते यत् पञ्च-शताधिक-प्रकारकाः पक्षिणः विविध-क्षेत्रेभ्यश्चात्र आगच्छन्ति। विगत-दिनेषु गाँन्धीनगरे 'सी.ओ.पी.-त्रयोदश'-इति सम्मेलने एतद्विषयकं सुबहु चिन्तनं, मननं, मन्थनं च जातं, भारतस्य प्रयासाश्च भूरिशः प्रशंसिताः। सखायः! एषः हि अस्माकं कृते गर्वविषयः यद्भारतं आगामि-त्रि-वर्षपर्यन्तं प्रवासिपक्षिणां विषये 'सी.ओ.पी.-सम्मेलन'स्य आध्यक्ष्यं निर्वक्ष्यति । एषः अवसरः कथं उपयोक्तुं शक्यते इत्यस्य कृते स्वीय-परामर्शान् अवश्यं प्रेषयन्तु।

'सी.ओ.पी.-सम्मेलन'-विषयिण्याः अस्याः चर्चायाः अवसरे ममावधानं मेघालय-सम्बद्धाम् महत्त्वपूर्णां सूचनां प्रति गतम् । साम्प्रतमेव जैव-वैज्ञानिकैः मत्स्यानाम् एका प्रजातिः अन्विष्टास्ति या केवलं मेघालये गुहासु एव प्राप्यते। आमान्यते यत् एषः मीनः

भूम्यन्तर्वर्ति-गुहासु निवसन्तीषु जल-जीवानां प्रजातिसु बृहत्तमः अस्ति। एषः मीनः एतासु गहनासु अन्धकार-युतासु भूम्यन्तर्वर्ति-गुहासु वसति, यत्र प्रकाशः अपि कदाचिदैव प्रविशति। वैज्ञानिकाः अपि एतस्मिन्विषये आश्चर्यान्विताः सन्ति यत्कथं एतादृक्-बृहदाकारः मत्स्यः एतावद्-गहनासु गुहासु जीवन् सन् निवसति । एतद्धि सुखदं वृत्तं यदस्मदीयं भारतं, विशेषेण च मेघालय-राज्यं कासाञ्चन अतीव-दुर्लभप्रजातीनां गृहमस्ति । इदं भारतस्य जैवविविधतायै नूतनमायामं प्रददाति। अस्माकं परिवेशे एतादृशानि बहूनि आश्चर्याणि सन्ति यानि अधुनाऽपि अज्ञातानि। एतेषाम् आश्चर्याणाम् अन्वेषणार्थं उत्कटान्वेषण-प्रवृत्तिः आवश्यकी।

महती तमिल-कवयित्री अव्वैयार-महाभागा लिखितवती - ''कट्टत केमांवु कल्लादरु उडगडवु कड्डत कमियन् अड़वा कल्लादर ओलाआडू'' इति।

अर्थात् यदपि वयं जानीमः तत्-मुष्टिपरिमिता सिकतास्ति परं यद्वयं न जानीमः तत् अखिल-ब्रह्माण्ड-सदृशमस्ति । एतद्देशस्य वैविध्यविषयेऽपि एतादृशमेवास्ति यत् यावन्तं वयं जानीयाम तत् अल्पमेव । अस्माकं जैव-विविधतापि समग्र-मानवतायाः कृते अद्भुतकोशमिवास्ति, यो हि अस्माभिः संकलनीयः संरक्षणीयः अन्वेषणीयः च।

मम प्रियाणि युवमित्राणि! अद्यत्वे अस्माकं देशस्य बालेषु, युवजनेषु च विज्ञानं प्रविधिं च प्रति रुचिः सततं वर्धमानास्ति। अन्तरिक्षे उपग्रहाणां सकीर्तिमानं प्रक्षेपणं, नूतनाश्च कार्यक्रमाः प्रत्येकं भारतीयं गर्वेण पूरयन्ति। चन्द्रयान-द्वितीयस्य प्रक्षेपणकाले यदाऽहं बैंगलूरु-नगरे आसम्, तदा मया दृष्टं यत्तत्र उपस्थितानां बालानां उत्साहः दर्शनीयः आसीत्। ते निद्रालवः नाऽसन्, पूर्णायामपि रात्रौ जागृताः अवर्तन्त। तेषु विज्ञानं, प्रविधिं, नवाचारं च प्रति यादृशी उत्सुकतासीत्, सा तु अविस्मरणीया एव । बालानां, यूनां च एनमुत्साहं अभिवर्धयितुं, तेषु वैज्ञानिकवृत्तिं च सम्वर्धयितुं एका अन्या व्यवस्था आरब्धास्ति। साम्प्रतं भवन्तः श्रीहरिकोटातः सञ्जायमानं रॉकेट्-प्रक्षेपणं पुरतः एव द्रष्टुं शक्नुवन्ति। सद्यः एवेदं सौविध्यं सर्वेषां कृते उपपादितम् । एका दर्शक-दीर्घा निर्मिताऽस्ति यस्यां जनानां दशसहस्रम् उपवेष्टुमर्हति। 'इसरो'-इत्यस्य अन्तर्जालोपरि संकेतितस्य सम्पर्कसूत्रस्यानुसारम् ऑन्-लाइन्-बुकिंग् - इति सद्यस्कम् आरक्षणमपि कर्तुं शक्यते । अहं सूचितोऽस्मि यत् केचन विद्यालयाः स्वीय-विद्यार्थिनः रॉकेट्-इति प्रक्षेप्य-यानस्य प्रक्षेपणं प्रदर्शयितुं तांश्चोत्प्रेरयितुं अत्रत्यं

पर्यटनमपि आयोजयन्ति। अहं सर्वेषां विद्यालयानां प्रधानाचार्यान् शिक्षकांश्च निवेदयामि यत्ते आगामिनि क्रमे एतस्य सौविध्यस्य लाभं नूनं गृह्णन्तु।

सखायः! अहं भवद्भ्यः अपरमेकं रोमाञ्चकं वृत्तं सूचयितुमिच्छामि। अहं 'नमो' - एप[Namo App] इत्यत्र झारखण्डस्य धनबादवासिनः पारस-नाम्नः टिप्पणीं पठितवान्। पारसः इच्छति यन्मया 'इसरो'-संघटनस्य 'युविका' कार्यक्रमस्य विषये युवजनाः सूचनीयाः । युवजनान् विज्ञानेन साकं योजयितुं 'युविका' इसरो-संघटनस्य बहु प्रशंसनीयः प्रयासः। एकोनविंशत्युत्तर-द्विसहस्रतमे वर्षे एषः कार्यक्रमः विद्यालयस्तरीय-विद्यार्थिनां कृते आरब्धः। 'युविका' अर्थात् 'युव-विज्ञानि-कार्यक्रमः' । एषः कार्यक्रमः अस्माकं 'जयतु युवा, जयतु कृषकः, जयतु विज्ञानम्, जयतु अनुसन्धानम् - इत्यस्य अनुरूपोऽस्ति। अस्मिन् कार्यक्रमे विद्यार्थिनः परीक्षाऽनन्तरं अवकाश-काले इसरो-संघटनस्य विभिन्न-केन्द्राणि गत्वा अन्तरिक्ष-प्रविधिं, अन्तरिक्ष-विज्ञानं, अन्तरिक्ष-प्रयुक्तिं च अवगच्छन्ति । भवन्तः यदि ज्ञातुमिच्छन्ति यदेतत् प्रशिक्षणं कीदृशमस्ति, कियत्प्रकारकमस्ति, कियत् रोमाञ्चकं वास्ति? तर्हि एतस्य पूर्व-सहभागिनां अनुभवान् भवन्तः अवश्यमेव पठन्तु । यदि भवन्तः स्वयमेव भागग्रहणे उत्सुकाः तर्हि इसरो-इत्यस्य युविका-जालदेशोपरि स्वीयं पञ्जीकरणं कर्तुं शक्नुवन्ति । मम युव-सखायः! भवत्कृतेऽहं जालसंकेतं सूचयामि। लिखन्तु; अद्यैव च अवश्यम् अन्वेषयन्तु। www.yuvika.isro.gov.in इति। अपि लिखितं वा?

मम प्रियाः देशवासिनः! अस्मिन् वर्षे जान्युआरि-मासे एकत्रिंशत्तमे दिनांके लद्दाखस्य दर्शनीयाः उपत्यकाः एकस्याः ऐतिहासिक-घटनायाः साक्षिण्यः अभूवन् । लेहस्य कुशोक-बाकुला-रिम्पोची-विमानपत्तनात् भारतीय-वायुसेनायाः 'ए.एन्.द्वात्रिंशत्-विमानं यदा उड्डीतं तदा अभिनवः इतिहासः विरचितो जातः। अस्मिन् उड्डयने प्रतिशतं दशमितस्य भारतीयस्य जैवजेट्-इन्धनस्य मिश्रणं कृतमासीत् । एषः हि प्रथमावसरः आसीद् यदा विमानस्य द्वयोः एव यन्त्रयोः एतद्-मिश्रणम् उपयुक्तम् । केवलमेतदेव नैव, लेहस्य यस्मात् विमानपत्तनात् एतेन विमानेन उड्डयनं विहितं तन्न केवलं भारतस्य, अपि तु विश्वस्यापि उच्चतमेषु विमानपत्तनेषु अन्यतममस्ति। अत्र वैशिष्ट्यमिदमेव यत् एतस्मिन् अभियाने प्रयुक्तं जैवजेट्-इन्धनं खाद्येतर-पादपानां तैलैः निर्मितं यद्धि भारतस्य विविधैः आदिवासिक्षेत्रैः क्रीयते।

एतादृशैः प्रयासैः न केवलं कार्बन्-इति प्राङ्गारस्य उत्सर्जनं न्यूनतरं भविष्यति, अपि तु अपरिष्कृत-तैलस्य आयाते भारतस्य निर्भरता अपि अल्पतरा भवितुमर्हति । अमुना महता प्रयोगेण सम्बद्धान् सर्वान् अहं वर्धापयामि । विशेषरूपेण ‘सी.एस्.आई.आर्.’-इत्यस्य देहरादूनस्य भारतीय-पैट्रोलियम्-संस्थानस्य च वैज्ञानिकाः प्रशंसार्हाः सन्ति यैः जैव-इन्धनेन प्रविधिः सम्भावितः । तेषां एषः प्रयासः ‘मेक् इन् इण्डिया’ - इति कार्यक्रममपि सबलं समर्थञ्च करोति।

मम प्रिया: देशवासिन:, अस्माकं नवभारतम् इदानीं पुरातनेन अभिगमेन चलितुं नास्ति सिद्धम्। विशेषरूपेण नवभारतस्य अस्माकं भगिन्य: मातरश्च अग्रेसृत्य समाह्वानानि स्वीकुर्वन्त्य: सन्ति येन सम्पूर्णे समाजे सकारात्मक-परिवर्तनानि दृश्यन्ते। बिहारस्य पूर्णिया-जनपदस्य कथा देशवासिभ्य: प्रेरणाप्रदात्री अस्ति। एतद्धि तच्छेत्रं यत् दशकेभ्य: जलाप्लावस्थितिं सम्मुखीकरोति। एतस्यां स्थित्यां, अस्मिन् क्षेत्रे कृषे: अन्यार्जनसाधनानां वा एकत्रीकरणं कठिनं भवति। परम् एतादृशीषु स्थितिषु पूर्णियाजनपदस्य कतिपय-महिलाभि: पृथग् एक: मार्ग: चित:। सखाय:! पूर्वम् अस्य क्षेत्रस्य महिलाः शहतूत वा मलबरी- इत्यनयो: वृक्षयो: प्राप्त-कौशेय-कीटेभ्य: कोकून-इति पदार्थं निर्मान्ति स्म यस्य अत्यल्पं धनं ता: प्राप्नुवन्ति स्म। यद्यपि तस्य क्रेतार: कोकून-इति पदार्थत: कौशेयसूत्रं निर्माय प्रभूतम् अर्जयन्ति स्म। परमद्य पूर्णिया-जनपदस्य महिलाभि: नूतनप्रकल्प: समारब्ध:। अथ समग्र-सङ्कल्पना-चित्रमेव परिवर्तितम्। एताभि: महिलाभि: प्रशासनसहयोगेन मलबरी-इत्यस्योत्पादन-समूहा: विरचिता:। तदनन्तरं कोकूनत: कौशेयसूत्रनिर्माणं ततश्च स्वयमेव कौशेय-सूत्रेभ्य: शाटिकानिर्माणं समारब्धम्। एतत् ज्ञात्वा भवन्त: आश्चर्यचकिता: भविष्यन्ति यत् पूर्वं यं कोकून-इति पदार्थं विक्रीय ता: अल्पं धनं प्राप्नुवन्ति स्म, सम्प्रति ताभि: निर्मिता: शाटिका: सहस्रश: रुप्यकेषु विक्रीयन्ते। "आदर्शजीविका-महिला-मलबर्युत्पादनसमूहस्य" भगिनीभि: य: उद्यम: कृत: तस्य परिणामा: सम्प्रति ग्रामेष्वपि दृश्यन्ते। पूर्णिया-जनपदस्य बहूनां ग्रामाणां कृषिका: इदानीं न केवलं शाटिका: सज्जीकारयन्ति अपि तु बृहन्मेलकेषु स्वीयापणानि प्रतिष्ठाप्य विक्रयणमपि कुर्वन्ति। एतत् एकम् उदाहरणं यत् अद्यतना नवमहिलाशक्ति: नवचिन्तनेन सह कथं नूतनलक्ष्याणि प्राप्नोति ।

मम प्रिया: देशवासिन: ! अस्माकं देशवासिनीनां महिलानां कन्यानाञ्च उद्यमशीलता, तासां साहसिकता च ननु गौरवाय एव । आत्मानं परित: नैकानि एतादृशानि उदाहरणानि भवन्ति यै: ज्ञानं भवति यत् कथं कन्या: प्राचीनावरोधान् अतिक्रम्य नवशिखराणि प्राप्नुवन्ति। अहं भवद्भि: सह द्वादशवर्षीयाया: पुत्र्या: काम्या-कार्तिकेयन्-नामधेयाया: उपलब्धे: अवश्यं चर्चां कर्तुम् इच्छामि। काम्यया केवलं द्वादश्यां वयसि एव mount aconcagua इति पर्वतशृङ्खला समारूढा। एतत् दक्षिणामेरिकायां ANDES -इति पर्वतस्य सर्वोन्नतं शिखरम् अस्ति यद्धि प्राय: सप्तसहस्र-मीटरपरिमितं उच्छ्रितं वर्तते । प्रत्येकं भारतीयस्य मन:स्पर्शिनी इयं वार्ता, यदा अस्य मासस्य प्रारम्भे काम्यया पर्वतशिखरमारुह्य सर्वप्रथमं तत्र अस्माकीन: ‘तिरङ्गा’- इति त्रिवार्णिकध्वज: उत्तोलित:। अहं सूचित: यत् देशाय गौरवप्रदात्री काम्या एकस्मिन् नूतने सङ्कल्पे अस्ति यस्य नामास्ति "Mission-साहस" इति। अस्यान्तर्गतं सा सर्वमहाद्वीपानां सर्वोन्नतशिखराणि आरोढुं प्रयतिष्यते। अस्मिन् अभियाने सा उत्तरदक्षिणध्रुवयो: ski-इति हिमक्रीडामपि कर्तुम् इच्छति। अहं काम्यायै "मिशन-साहस"- इत्यस्य कृते शुभकामना: प्रकटयामि।

वस्तुत: काम्याया: उपलब्धि: सर्वान् सुस्वस्थान् स्थातुं प्रेरयति। अस्मिन् लघु वयसि काम्या यानि शिखराणि प्राप्तवती तत्र fitness इति शारीरिकसौष्ठवस्य वर्तते महती भूमिका। A nation that is fit will be a nation that is hit. अर्थात् य: देश: सर्वथा सुस्थ: भवति स: सर्वदा कीर्तिमान् भविष्यति। आगामि-मासा: तु साहसिकक्रीडाभ्य: अपि उपयुक्ता: सन्ति। भारतस्य भौगोलिकता एवंप्रकारिका अस्ति या अस्माकं देशे साहसिकक्रीडार्थं अस्मभ्यं नैकान् अवसरान् प्रददाति। एकत: यत्र उन्नताः पर्वता: सन्ति, तर्हि अपरत: सुदूरं यावत् विस्तृता मरुभूमि:। एकत: यत्र सघन-वनक्षेत्राणि तर्हि अपरत: समुद्रस्य असीमविस्तर:। अत: मम एतत् विशिष्टं निवेदनमस्ति यत् भवन्त: अपि स्वरुच्यनुसारं क्रियाकलापं चिन्वन्तु, स्वजीवने साहसिकतां च योजयन्तु। जीवने साहसिकं तु किमपि भवेद् एव!

सखायः! द्वादश-वर्षीयाया: काम्याया: सफलतानन्तरं यदा भवन्त: पञ्चाधिकैकशतं वर्षीयाया: भागीरथी-अम्बाया: कथां श्रोष्यन्ति तदा इतोऽपि समधिकाः आश्चर्यचकिता: भविष्यन्ति। मित्राणि! यदि वयं जीवने प्रगतिम् इच्छाम:, विकासम् इच्छाम:

तर्हि आद्य: समय: भवति यत् अस्माकम् अन्तर्विद्यमान: विद्यार्थी कदापि निर्जीव: न भवेत्। अस्माकं पञ्चाधिकैकशतं वर्षीया भागीरथी-अम्बा अस्मभ्यम् एतदेव प्रेरयति। इदानीं भवन्त: चिन्त्यमाना: स्यु: का एषा भागीरथी-अम्बा? भागीरथी अम्बा केरलान्तर्गते कोल्लम्-स्थाने निवसति। शैशवावस्थायामेव तस्या: माता दिवङ्गतासीत्। अल्पीयसि वयसि विवाह: जात:, ततश्च पति: अपि दिवङ्गत:। परं भागीरथ्यम्बया स्वात्मविश्वास: न त्यक्त:, कर्मठता न परित्यक्ता। दशवर्षीयाया: अवस्थाया: पूर्वमेव अनिच्छया विद्यालय: त्यक्त:। पुन: पञ्चाधिकैकशतं वयसि विद्यालयीयम् अध्ययनं समारब्धम्। अस्मिन् प्रौढवयसि भागीरथ्या अम्बया चतुर्थस्तरीया परीक्षा विलिखिता, साकाङ्क्षं परिणामाय अपि प्रतीक्षां कृतवती। सा परीक्षायां प्रतिशतं पञ्चसप्ततिमितान् अङ्कान् प्राप्तवती। अग्रेऽपि सा परीक्षा: लेखितुम् इच्छति। स्पष्टमेव भागीरथी-अम्बा-सदृशा: जना: अस्य देशस्य शक्तित्वेन विराजन्ते , प्रेरणाया: स्रोतांसि विद्यन्ते। अहमद्य विशेषरूपेण भागीरथीम् अम्बां प्रणमामि।

मित्राणि! जीवनस्य विपरीतसमये अस्माकं आत्मविश्वास: अस्माकम् इच्छाशक्तिश्च कामपि परिस्थितिं परिवर्तयितुं शक्नोति। सम्प्रति एव मया सञ्चारमाध्यमेषु एकं वृत्तं पठितम् यदहं भवद्भि: सह चर्चयितुम् इच्छामि। एषा कथास्ति मुरादाबादस्य हमीरपुर- वास्तव्यस्य सलमानस्य। सलमान: जन्मना एव दिव्याङ्ग: अस्ति। तस्य पादौ असहयोगिनौ। परमस्यां कठिनावस्थायाम् अपि पराजयं नैव स्व्यकरोत्। स्वकीयं कार्यम् आरब्धुं सङ्कल्पितवान्। सहैव एतदपि निर्णीतवान् यत् अन्यदिव्याङ्गानाम् अपि सहायतां करिष्यामीति। तत: किम् ? सलमानेन स्वीये ग्रामे एव पादत्राण-निर्माणं detergent-इति फेनकचूर्ण-निर्माणं च समारब्धम्। क्रमश: त्रिंशत् दिव्याङ्गा: कर्मणि योजिता: अभवन्। भवन्त: एवमपि विचारयन्तु यत् य: स्वयं चलितुम् अक्षम:, स: अन्येषां चलने सौख्यप्रदात्रीं पादरक्षां निर्मातुं निर्णीतवान्। विशिष्टमेतदपि यत् सलमान: सहकर्मिणां प्रशिक्षणं स्वयमेव कृतवान्। इदानीम् एते सर्वे मिलित्वा निर्माणम् अपि कुर्वन्ति निर्मितानां च प्रचारात्मिकां विक्रयणव्यवस्थाम् अपि कल्पयन्ति। स्वीयपरिश्रमेण न केवलं वृत्तय: सृष्टा: अपितु समवाय: अपि लाभान्वित: कृत:। इदानीम् एते सर्वे मिलित्वा दिवसे पञ्चाशदधिकैकशतं युगलपादरक्षा: निर्मान्ति। न एतेन अलं, सलमानेन अस्मिन् वर्षे इतोऽपि शतं दिव्याङ्गेभ्य: वृत्तिं प्रदातुं सङ्कल्पितम्। अहम् एतेषां दृढेच्छाशक्तिं उद्यमशीलतां च नौमि।

एतादृशी एव सङ्कल्पशक्तिः, गुजरातस्य कच्छप्रदेशस्य अज़रक-ग्रामवासिभिः अपि प्रदर्शिता। एकाधिक-द्विसहस्रतमे वर्षे यदा विनाशकारि-भूकम्पानन्तरं सर्वे ग्रामं त्यक्त्वा गच्छन्तः आसन् तदा इस्माइल-खत्री-नामधेयेन ग्रामे स्थित्वा "अज़रक-प्रिण्ट" इति पारम्परिक-कला-संरक्षणाय सङ्कल्पितम्। तदनन्तरं दर्शं दर्शं प्रकृतिवर्णनिर्मिता कला एषा सर्वेषां मनांसि आकृष्टवती, फलतः एषः सम्पूर्णः ग्रामः हस्तशिल्पकला-सम्बद्धया पारम्परिक-विधया सह संयुक्तोऽभवत्। ग्रामवासिभिः न केवलं सहस्रवर्षप्राचीना कला संरक्षिता अपि तु, अद्यतनया वस्त्राधानपद्धत्यापि संयुक्तीकृता। इदानीं प्रसिद्धाः वस्त्रनिर्मातारः परिधानकलाकाराः चापि अज़रकमुद्रणं प्रयोक्तुं प्रभवाः। ग्रामस्य श्रमयुतानां जनानां कारणेन 'अज़रकप्रिण्ट'-इति अद्यत्वे प्रसिद्धनाम सञ्जातम्। विश्वस्य प्रमुखवस्त्रक्रेतारः अस्मै मुद्रणाय रुचिमन्तः दृश्यन्ते।

मम प्रियाः देशवासिनः, नातिचिरं सम्पूर्णेऽपि देशे महा-शिवरात्रि-पर्व आमानितम् । भगवतः शिवस्य मातुः पार्वत्याः चाशीर्वादः देशस्य चेतनां सततं जागृतां सन्धारयन् अस्ति । महाशिवरात्रि-पर्वणि भोले-बाबा-भगवतः आशीर्वादः भवत्सु सततं स्यात्, भवतां भवतीनाञ्च प्रत्येकमपि मनोकामनां परेशः शिवः प्रपूरयेत्, भवन्तः ऊर्जावन्तः भवन्तु, स्वस्थाः स्युः, सुखिनो भवन्तु तथा च, देशस्य कृते स्वीयानि कर्तव्यानि परिपालयन्तो भवन्तु ।

सखायः, महाशिवरात्रि-पर्वणा साकमेव वसन्ततोः आभापि अनुदिनम् इतः परम् समधिकम् एधिता । आगामिषु दिनेषु होलिकोत्सवः अपि वर्तते, तदनुपदमेव गुड़ी-पड़वा अपि आगन्ता । नवरात्रि-पर्व अपि अमुना संयुक्तमेव भवति । रामनवमी-पर्व अपि आगन्ता । पर्वाणि उत्सवाः च, अस्मदीये देशे सामाजिक-जीवनस्य अभिन्नाङ्गत्वेन प्रवर्तमानाः सन्ति । प्रत्येकमपि पर्वणः पृष्ठभूमौ कश्चन एतादृशः सामाजिक-सन्देशः अन्तर्निहितोऽस्ति यो न केवलं समाजं, कृत्स्नमपि देशम्, एकता-सूत्रेण बद्ध्वा, सन्धारयति ।

होलिकोत्सवानन्तरं चैत्र-मासे शुक्ल-पक्षे प्रथमा-तिथितः भारतीयं नूतनं विक्रम-वर्षमपि आरभते । तदर्थमपि, भारतीय-नव-वर्षस्य कृतेऽपि, अहं भवद्भ्यः अग्रिमाः शुभकामनाः व्याहरामि ।

मम प्रियाः देशवासिनः, आगामि-'मनोगतम्'- यावत्तु, मां प्रतिभाति, कदाचित् विद्यार्थिनः परीक्षासु व्यापृताः भवितारः । येषां यासाञ्च परीक्षा पूर्णा, ते आनन्द-मग्नाः भवेयुः

| ये व्यापृताः सन्ति, ये आनन्दमग्नाः च वर्तन्ते, तेभ्योऽपि ताभ्योऽपि च, अनेकानेकाः शुभकामनाः व्याहरन्, आगच्छन्तु, आगामि-‘मनोगतम्’ -प्रसारणस्य कृते असंख्य-वृत्तानि आदाय पुनः मेलिष्यामः |

भूरिशः धन्यवादः| नमस्कारः!

ooo ooo ooo ooo

- [भाषान्तरं – सर्वश्री-डॉ.श्रुतिकान्त-पाण्डेय-गवीश-द्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com

दूरभाषः - ९८१० ५६२२ ७७